नवरत्नमालिका अंबिकास्तुतिः

नवरत्नमालिका अंबिकास्तुतिः

(श्रीकालहस्तिक्षेत्रस्थज्ञानप्रसूनांबिकास्तुतिः)
श्रीनरकंठीरवशास्त्रिविरचिता |
श्रीनाकनाथमुखनानासहस्रसुरसेनाग्रमौलिवलभी-
सूनावलीबहुललीनालिनीमधुरगानांचितांघ्रिनलिना |
मानातिलंघिमहिमानादिरानतजनानामनेकफलदा
ज्ञानांबिका भवतु दीनावनी कुशलदानाय मे भगवती || 1 ||

राकाशशांकरुचिराकारचारुपादना(पतदा)काशसिंधुलहरी-
नीकाशसूक्तिसरणीकारिणी प्रकृतिमूकात्मनामपि नृणां |
पाकाहितप्रमुखनाकालयप्रकरशोकापनोदनचणा
श्रीकालहस्तिनगरैकायनावतु पिनाकायुधस्य दयिता || 2 ||

श्रेणीभवद्विषदेणीदृगुल्लसितवेणीपिनद्धसुमनो-
द्रोणीमरंदरसवेणीप्रसारभृशशोणीकृतांघ्रिकमला |
श्रोणीनटत्सरकृपाणीमनोज्ञघनवेणी कृपार्द्रहृदया
क्षोणीधरेंद्रतनयाणीयसीमपि च वाणीं प्रगल्भयतु मे || 3 ||

केलीसमाकलिततालीदलश्रवणपालीविभूषणमणी-
वा(पा)ली मदोद्धतमरालीगतिर्दिशतु नालीकदीर्घनयना |
चूलीतलाभरणनालीकवैरिशकलालीभवत्सुरवधूःऽ
काली गिरं मृदु मृणालीभुजा मम मधूलीरसोर्मिमधुरां || 4 ||

हृद्यानवद्यतरगद्यानुबद्धमृदुपद्याभिरूपकवितां
दद्याज्जगन्महितविद्यां त्रयीशिखरवेद्या हिमाद्रितनया |
आद्या परा मम शरद्यामिनीशभृदविद्याविलासशमनी
विद्याधरी समभिवाद्या ज्वलन्मणिनिषद्यायमाणरशना || 5 ||

हालामदाकलितहेलालसद्बहुललोलारुणाक्षियुगली
लीलापिनद्धसुरसालावलीप्रसवमालासुगंधचिकुरा |
कैलासनाथहितशीला करांचितशुकालापलोलहृदया
वेलातिलंघिशुभजालाय मे भवतु शैलाधिनाथतनया || 6 ||

चंडापदानयुतचंडाभिधासुरपिचंडावदारणचणा
भंडासुरोग्रभुजदंडाग्रनिर्दलनशौंडायुधोद्धतकरा |
शुंडानुकारिकरकांडावदीर्णजगदंडाट्टहासभयदा
दंडायुधाय शशिखंडावतंसितशिखंडा न चार्पयतु मां || 7 ||

हुंकारनिर्गलदशंकापतद्विषदहंकारमारतिमिरां
अंकांतलंबिसितक्ङालहारसदलंकारबंधुरगलां |
ह्रींकारिणीं भयदटंकारकार्मुककरां कालहस्तिनिलयां
पंकापहामपकलंकावतंसहरिणांकां भजे भगवतीं || 8 ||

कंठारवोद्यदुपकंठारिदुर्विषहकंठीरवेंद्रगमनो-
त्कंठा निकामशितिकंठानुकर्षिकलकंठानुलापललिता |
शुंठीभवद्दनुजकंठीरवप्रकरकुंठीकृतिक्षमबला
कुंठीकरोतु नरकंठीरवाख्यकविकंठीरवस्य दुरितं || 9 ||

श्रीकालहस्तिनिलयज्ञानप्रसवांबिकामुदे रचिता |
नरकंठीरवकृतिना नवरत्नस्तुतिरियं चिरं जयतु || 10 ||इति श्रीनरकंठीरवशास्त्रिविरचिता नवरत्नमालिका समाप्ता||